सुत्वा, [न्] पुं, (सु + "सुयजोर्ङ्वनिप् ।" ३।२।१०३ । इति ङ्वनिप् ।) अभिषवे कृती । इत्यमरः । २।७।४७ ॥ अभिषवः स्नानमात्रं इह तु प्रस्तावात् यज्ञाङ्गस्नानं तत् कृतवान् यः स सुत्वा कथ्यते । सुञः क्वनिप् तन् सुत्वा कृतीति अधीतिवत् । कृते इति पाठे सप्तमी । इति भरतः ॥

सुद, इ शोभे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) सुन्दरम् । इति दुर्गादासः ॥ सौत्रधातुरयम् ॥

सुदग्धिका, स्त्री, (सुष्ठु दग्धं दाहोऽस्त्यस्या इति सुदग्ध + ठन् । ) दग्धानामक्षुपः । इति राजनिर्घण्टः ॥

सुदण्डः, पुं, (शोभनो दण्डो यस्मात् । ) वेत्रः । इति राजनिर्घण्टः ॥

सुदण्डिका, स्त्री, गोरक्षी । इति राजनिर्घण्टः ॥

सुदन्, [त्] त्रि, (शोभना दन्ता यस्य । "वयसि दन्तस्य दतृ ।" ५।४।१४१ । इति दतृ । ) शोभनदन्तविशिष्टः । (स्त्रियां ङीप् । यथा, रघुः । ६ । ३७ ।

"विधाय सृष्टिं ललितां विधातु-
र्जगाद भूयः सुदतीं सुनन्दा ॥"

शोभनो दत् दन्तः इति विग्रहे सुदत् इत्येव स्यात् । शोभनदन्तः । यथा, भागवते । ३ । २३ । ३२ ।

"सुभ्रुवा सुदता श्लक्ष्णस्निग्धापाङ्गेन चक्षुषा ।
पद्मकोशस्पृधा नीलैरलकैश्च लसन्मुखम् ॥")

सुदन्तः, पुं, (शोभनो दन्तो यस्य । वयोगम्यमानाभावात् न दत्रादेशः ।) नटः । इति केचित् । शोभनदन्तश्च ॥

सुदन्ती, स्त्री, (शोभनो दन्तो यस्याः । ङीप् । वयोगम्यमानाभावात् न दत्रादेशः । ) दिक्करिणीविशेषः । शुभदन्तीशब्ददर्शनादिति केचित् ॥

सुदर्भा, स्त्री, (सुष्ठु दर्भो यत्र ।) इक्षुदर्भा । इति राजनिर्घण्टः ॥ शोभनकुशयुक्ते, त्रि ॥

सुदर्शनं, क्ली, (सुष्ठु दृश्यते इति । सु + दृश् + ल्युट् । शोभनं दर्शनमस्येति वा । ) इन्द्रनगरम् । इति मेदिनी ॥

सुदर्शनः, पुं, क्ली, (शोभनं दर्शनमस्येति ।) विष्णुचक्रम् । इत्यमरः । १ । १ । २८ । तस्योत्पत्तिर्यथा,—

"तस्मात् प्रसादं कुरु मे यद्यनुग्रहभागहम् ।
अपनेष्यामि ते तेजः कृत्वा यन्त्रे दिवाकर ॥
रूपं तव करिष्यामि लोकानन्दकरं प्रभो ।
तथेत्युक्तः स रविणा भ्रमौ कृत्वा दिवाकरम् ॥
पृथक् चकार तत्तेजश्चक्रं विष्णोरकल्पयत् ।
त्रिशूलञ्चापि रुद्रस्य वज्रमिन्द्रस्य चाधिकम् ।
दैत्यदानवसंहर्त्तुः सहस्रकिरणात्मकम् ॥"

इति मात्स्ये । ११ । २७-३० ॥ * ॥

अपि च पाद्मोत्तरखण्डे १४५ अध्याये ।

ईश्वर उवाच ।

"नायमेभिर्महातेजाः शस्त्रास्त्रैर्वध्यते मया ।
देवाश्च स्वस्वतेजांसि शस्त्रार्थं दीयतां मम ॥

नारद उवाच ।

अथ विष्णुमुखा देवाः स्वतेजांसि ददुस्तथा ।
तान्यैक्यं वै गतानीशो दृष्ट्वा स्वस्मासुचन्महः ॥
तेनाकरोन्महादेवः सहसा शस्त्रमुत्तमम् ।
चक्रं सुदर्शनं नाम ज्वालामालातिभीषणम् ।
तेजःशेषेण च तथा वज्रञ्च कृतवान् हरः ॥"

तच्च शिवेन विष्णवे दत्तम् । यथा,—

"ततः प्रीतः प्रभुः प्रादात् विष्णवे प्रवरं वरम् ।
प्रत्यक्षं तैजसं श्रीमान् दिव्यं चक्रं सुदर्शनम् ॥
तद्दत्त्वा देवदेवाय सर्व्वभूतभयप्रदम् ।
कालचक्रनिभं चक्रं शङ्करो विष्णुमब्रवीत् ॥
वरायुधोऽयं देवेश सर्व्वायुधनिवर्हणः ।
सुदर्शनो द्वादशारो यो मनःसदृशो जवी ॥
आरात् स्थिता अमी चात्र देवा मासाश्च राशयः ।
शिष्टानां रक्षणार्थाय संस्थिता ऋतवस्तु षट् ॥
अग्निः सोमस्तथा मित्रो वरुणश्च प्रजापतिः ।
इन्द्राग्नी चाप्यथो विश्वे प्रजापतय एव च ॥
हनूमांश्चाथ बलवान् देवो धन्वन्तरिस्तथा ।
तपांश्चैव तापसश्च द्वादशैते प्रतिष्ठिताः ॥
चैत्राद्याः फाल्गुनान्ताश्च मासास्तत्र प्रतिष्ठिताः ॥
त्वमिदमादाय विभो वरायुधं
शत्रुं सुराणां जहि मा विशङ्किथाः ।
अमोघ एषोऽमरराजपूजितो
धृतो मया देहगतस्तपोबलात् ॥"

इति वामने ७९ अध्यायः ॥ * ॥

वैष्णवाङ्गे तच्चिह्नधारणविधिः यथा । ब्रह्माण्डे ।

"कृत्वा धातुमयीं मुद्रां तापयित्वा स्वकां तनुम् ।
चक्रादिचिह्नितां भूप धारयेद्वैष्णवो नरः ॥"

नारदीयपञ्चरात्रे ।

"द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम् ।
हरेः सुदर्शनं तप्तं धारयेत्तद्विचक्षणः ॥"

इति श्रीहरिभक्तिविलासे १५ विलासः ॥

अन्यत् मुद्राशब्दे द्रष्टव्यम् ॥ * ॥ श्रीमन्दिरोपरि देयतच्चक्रप्रमाणं यथा—

"बिम्बार्द्धमानं चक्रन्तु त्रिभागेणाथ कारयेत् ।
द्वात्रिंशदङ्गुलं ज्येष्ठं कनिष्ठं त्वष्टहानितः ॥
प्रतिमातुर्य्यभागेन कारयेद्वा सुदर्शनम् ।
लोहजं शैलजं वापि कारयेच्चिह्नपूर्व्वकम् ॥
अष्टारं द्वादशारं वा मध्ये मूर्त्तिसमन्वितम् ।
नारसिंहेन रौद्रेण विश्वरूपेण वा पुनः ॥"

इत्यादि ॥ * ॥

"अधिवास्य विधानेन चक्रं दण्डं ध्वजं तथा ।
देववत् सकलं कृत्वा मण्डपस्नपनादिकम् ॥
नेत्रोन्मीलनकं कृत्वा पूर्व्वोक्तं सर्व्वमाचरेत् ।
अधिवासयेत विधिना शय्यायां प्राप्य देशिकः ॥
ततः सहस्रशीर्षेति सूक्तं चक्रे न्यसेद्बुधः ।
तथा सौदर्शनं मन्त्रं मनस्तत्त्वं निवेशयेत् ॥
मनोऽनुरूपेणास्यैव सजीवकरणं स्मृतम् ।
आरेषु मूर्त्तयो न्यस्याः केशवाद्याः सुरोत्तमाः ॥
नाभ्यक्षप्रतिनेमीषु न्यसेत्तत्त्वानि देशिकः ।
नारसिंहं विश्वरूपमक्षमध्ये निवेशयेत् ॥
सकलं विन्यसेद्दण्डे सूत्रात्मानं सजीवकम् ।
निष्कलं परमात्मानं ध्वजे ध्यायन् न्यसेद्धरिम् ॥
तच्छक्तिं व्यापिनीं ध्यायेत् ध्वजरूपाञ्चलाननाम् ।
ततो मण्डपमध्ये तु स्थाप्य पुज्य यथाविधि ॥
पूर्व्वोक्तेन विधानेन होमं कुण्डेषु कारयेत् ॥
ततः प्रभातसमये मूर्त्तिपैः सह देशिकः ।
मूर्त्तिपः आचार्य्यः ।
कलसे स्वर्णशकलं न्यस्वा रत्नानि पञ्च च ।
स्थापयेच्चक्रमन्त्रेण स्वर्णचक्रमधस्ततः ॥
पारदेन तु संप्लाव्य नेत्रपट्टेन स्थापयेत् ।
ततो निवेशयेच्चक्रं द्वादशारं सुदर्शनम् ॥
दुर्निरीक्ष्यं सुरैर्दैत्यैर्भ्रं महाक्रिस्फुलिङ्गकम् ।
तन्मध्ये चिन्तयेद्देवं नृसिंहं दैत्यनिर्द्दलम् ॥
स्फुरत्सौदामिनीजिह्वं ज्वलज्ज्वलनकेशरम् ।
दीप्तार्कनयनं चन्द्रकोटिभास्वरदंष्ट्रिणम् ॥
तप्तस्य तपनीयस्य सदृक्षं परुषाननम् ।
सर्व्वदुष्टहरं देवं दुष्प्रेक्ष्यं देवदानवैः ॥
सर्व्ववर्णान्तबीजेन चतुर्द्दशयुतेन च ।
बिन्दुनालङ्कृतेनादौ प्रणवेन युतेन च ।
अन्ते प्रणतियुक्तेन स्थापयेद्दृष्टनाशनम् ॥"

इति श्रीहरिभक्तिविलासे १९ विलासः ॥ * ॥

चक्रमन्त्रो यथा । ॐ नमो भगवते सुदर्शनाय निर्णाशितसकलरिपुध्वजाय भगवन्नारायणकराम्भोरुहस्पर्शदुर्ल्ललिताय ।

"एह्येहि त्वं सहस्रार चक्रराज सुदर्शन ।
यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः ॥"

इति च तत्रैव १५ विलासः ॥

सुमेरुः । जम्बूवृक्षः । इति मेदिनी ॥ (यथा, मात्स्ये । ११३ । ७४—७५ ।

"सुदर्शनो नाम महान् जम्बूवृक्षः सनातनः ।
नित्यपुष्पफलोपेतः सिद्धचारणसेवितः ॥
तस्य नाम्ना समाख्यातो जम्बूद्वीपो वनस्पतेः ।
योजनानां सहस्रञ्च शतधा च महान् पुनः ॥
उत्सेधो वृक्षराजस्य दिवमाहत्य तिष्ठति ॥")

वृत्तार्हत्पिता । जिनानां बलदेवः । इति हेमचन्द्रः ॥ (मत्स्यः । तत्पर्य्यायो यथा,—

"मत्स्यो मीनो विसारश्च झषो वैसारिणोऽण्डजः ।
शकुली पृथुरोमा च स सुदर्शन इत्यपि ।
रोहिताद्यास्तु ये जीवास्तेमत्स्याः परिकीर्त्तिताः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

सुदर्शनः, त्रि, सुदृश्यः । सुखेन दृश्यते असौ इति सुपूर्व्वकदृशधातोः कर्म्मणि खलप्रत्ययेन निष्पन्नः । इति मुग्धबोधटीकायां दुर्गादासः ॥ (शोभनं दर्शनं यस्येति वा । यथा, भागवते ।४।२४।५१

"श्यामश्रोण्यधिरोचिष्णुदुकूलस्वर्णमेखलम् ।
समचार्व्वङ्घ्रिजङ्घोरु निम्नजानुसुदर्शनम् ॥"